।। कोबातीर्थमंडन श्री महावीरस्वामिने नमः ।।

।। अनंतलब्धिनिधान श्री गौतमस्वामिने नमः ।। ।। गणधर भगवंत श्री सुधर्मास्वामिने नमः ।।

।। योगनिष्ठ आचार्य श्रीमद् बुद्धिसागरसूरीश्वरेभ्यो नमः ।। ।। चारित्रचूडामणि आचार्य श्रीमद् कैलाससागरसूरीश्वरेभ्यो नमः ।।

# आचार्य श्री कैलाससागरसूरि ज्ञानमंदिर

## पुनितप्रेरणा व आशीर्वाद

## राष्ट्रसंत श्रुतोद्धारक आचार्यदेव श्रीमत् पद्मसागरसूरीश्वरजी म. सा.

### जैन मुद्रित ग्रंथ स्केनिंग प्रकल्प

ग्रंथांक : १

**श्री महावीर जैन आराधना केन्द्र**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-श्री महावीर जैन आराधना केन्द्र
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
कोबा, गांधीनगर-३८२००७ (गुजरात)
(079) 23276252, 23276204
फेक्स : 23276249
Websiet : www.kobatirth.org
Email : Kendra@kobatirth.org

**शहर शाखा**

आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
शहर शाखा
आचार्यश्री कैलाससागरसूरि ज्ञानमंदिर
त्रण बंगला, टोलकनगर
परिवार डाइनिंग हॉल की गली में
पालडी, अहमदाबाद – ३८०००७
(079) 26582355

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

gyanmandir@kobatirth.org

# अथत्रिंशश्लोकीप्रारभ्यते॰

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir




For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥श्रीगणेशायनमः॥ ॥नत्वागणेश्वरंदेवंशारदांगुरुमात्मनः॥ आशौचनिर्णयंत्रिंशच्छ्लोक्याव्याख्यांकरोम्य
हम्॥ १॥ तत्रस्मार्तक्रममुल्लंघ्यलोकप्रसिद्धक्रममनुसरन्गर्भविपत्तिनिमित्ताशौचक्रमेणआशौचं
प्रतिपादयति॥ अस्यान्वयः॥ ॥षण्मासाभ्यंतरेषुषण्णांमासानांअभ्यंतराणिमध्यानितेषुस्वपुरुष

षण्मासाभ्यंतरेषुस्वपुरुषनिहतेगर्भमात्रेविनष्टेमातातन्मासंख्यासम
दिनमशुचिःस्नानशुद्धाःसपिंडाः॥ अंत्येमासद्वयेतुत्रिदिनमशुचयोतः
परंसूतिवत्स्याच्चातुर्वर्ण्यस्यतुल्यंभवतिवयसियस्मोच्यतेशौचमात्रं॥ १

निहतेभर्त्तृनिहतेगर्भमात्रेअपूर्णावयवेगर्भेविनष्टेच्युतेमाताजननीतन्मासंख्ययासमदिनंते
षांमासानांगर्भधारणादारभ्यप्रत्येकंयायासंख्यातयासमानिदिनानियत्रतद्यथाभवंतितथाअशुचि

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



रशुध्यास्यात् अत्रस चासौमासश्चतन्मासः॥ तस्यसंख्यातयासमानानिदिनानि यस्मिन्काले तन्मितिसमा
सः तथाचायमर्थः॥ गर्भधारणमासमादिं कृत्वायन्मासापर्यंतरे गर्भोविनष्टे॥ तन्माससंख्ययासमदिना
नीति॥ अत्रयद्यप्यविशेषेणोक्तं तथापिचतुर्थमासमारभ्यषण्मासपर्यंतं द्रष्टव्यम्॥ आद्येमासत्रये
पित्रिरात्रमेव॥ मातुरविशेषेणसपिंडानांनाशौचम्॥ तथाचमरीचिः॥ गर्भस्रुत्यांयथामासमचि
रेतूत्तमेत्रयइति॥ अचिरेआद्यमासत्रयेउत्तमेब्राह्मणज्ञातौत्रयोदिवसाआशौचहेतवःस्युः॥ मा
सत्रयेत्र्यहमितिगौतमोक्तेः॥ ॥ तथाचस्मृत्यंतरमपि॥ स्रावेमातुस्त्रिरात्रंस्यात्सपिंडाशौचव
र्जनमिति॥ एवंमातुराशौचमभिधायसपिंडानामाह॥ ॥ स्नानशुद्धाःसपिंडाः॥ सपिंडाःसप्त
मपुरुषावसानाः॥ स्नानेनशुद्धाःस्युरिति॥ सद्यःशौचंसपिंडानांगर्भस्यपतनेसतीतिस्मरणा १
त्॥ एवंसपिंडानांचतुर्थमासादित्रयेऽविशेषेणसद्यःशौचेप्राप्तेपंचमषष्ठयोर्विशेषमाह॥ ॥

For Private And Personal Use Only

अंत्यइति ॥ अंत्येमासद्वयेषण्णांमासानांमध्येयदंत्यंमासद्वयंपंचमषष्ठाख्यंतत्रसपिंडास्त्र्यादिनमशौच

यःस्युरितिसंबंधः ॥ तथाचस्मृतिः ॥ पातेमातुर्यथामासंपित्रादीनांदिनत्रयमितिवचनात्त्रैतिभावः ॥

॥ अत्रपातःपंचमषष्ठयोरितिवचनात्पातशब्दःपंचमषष्ठमासोपलक्षणपरः ॥ ॥ अतःषण्मा

सादूर्ध्वंसप्तमाष्टममासयोःसूतिवत्स्यात् ॥ आशौचमितिशेषः ॥ सूतिःप्रसवोजननंतत्रैवेतिसूतिवत्प्र

सवनिमित्तंदशाहंनान्यनिमित्तमितियावत् ॥ सूतेर्दशाहाशौचनिमित्तत्वात् ॥ दशाहंशावमाशौचंसपिं

डेषुविधीयते ॥ जननेप्येवमेवस्यान्निपुणांशुद्धिमिच्छतामिति ॥ मनूक्तप्रसिद्धा ॥ तथाचस्मृतिः ॥ ष

ण्मासाभ्यंतरेयावत्गर्भस्रावोभवेद्यदा ॥ तदामाससमैस्तासांदिवसैःशुद्धिरिष्यते ॥ अतऊर्ध्वंस्वजा

त्युक्तंतासामाशौचमिष्यति ॥ तथाहारीतोपि ॥ जातमात्रेमृतेमृतजातेवासपिंडानांदशाहमिति ॥ एतस्यचा

तुर्वर्ण्यसाधारणतामाह ॥ चातुर्वर्ण्यस्यतुल्यमिति ॥ एतदाशौचंचातुर्वर्ण्यस्यचतुर्णांवर्णानांतुल्यंसा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



साधारणंभवति॥ नात्रकश्चनवर्णकृतोविशेषः॥ नकेवलमिदमेवतुल्यंवयोवस्थाविशेषोपरतिनिमि त्तमपिचतुर्वर्णसाधारणमित्याह॥ वयसियदिनियद्वयसिविशेषोपरतिनिमित्तमाशौचंवर्णविशेषो- पादानरहित्येनविहितंतदपिचातुर्वर्ण्यस्यतुल्यंभवति॥ तदुक्तंव्याघ्रपादमुनिना॥ तुल्यंवयसिस र्वेषामतिक्रांतेतथैवचेति॥ अत्रस्वपुरुषनिहितइत्यनेनपरपुरुषनिहितेजननीव्यतिरिक्तानामा

जन्माशौचांतरालेयदिशिशुर्नशनंनालछेत्स्यूर्ध्वकालेनिःप्राणोनिःपतेद्वाजन
नजनितमाशौचमस्त्येवहृत्स्नम्॥ शौचाभावोध्वनितः॥१॥ इदानींपूर्णप्रसवनिमित्त

माशौचंद्वितीयवृत्तेनाह॥ ॥जन्मेति॥ जन्माशौचांतरालेजन्माशौचमध्येनालछेत्स्यूर्ध्वकालेनाल छेदनानंतरंयदिशिशोर्नशनमुपरमःस्यात्॥ अथवा॥ निःप्राणःप्राणरहितोवानिःपतेत्निर्गछेत्त २

तदाजननजनितंजन्मनिमित्तमाशौचंपूर्णकृत्स्नमस्त्येव नशावशौचेनतन्निवृत्तिः॥किंतुजन्माशौचेनैव शिशूपरमनिमित्ताशौचनिवृत्तिरितिभावः॥ तदुक्तंबृहन्मनुना॥ दशाहाभ्यंतरेबालेप्रमीतेतस्यबांधवैः॥ शावाशौचंनकर्त्तव्यंसूत्याशौचंविधीयतेइतिच॥यदिजननानंतरंनालछेदनात्प्राक्निधनमुपगतस्तर्हिसर्वेषांपित्रादीनांत्र्यहेणैवशुद्धिःस्यादितिशेषः॥इहविषयेसूतिकायामातुःसकलकंसंपूर्णदशा

प्राङ्नालछेदनाच्चेन्निधनमुपगतस्तत्र्यहेणैवशुद्धिः सर्वेषांसूतिकायास्त्वहच्चसकलकंप्रेतशुद्धिस्तुसद्यः॥२॥ हंप्रसवनिमित्तंस्यात्॥शावशुद्धिस्तुसद्यः॥

प्रसवनिमित्तमेवभवति॥नशावमितिभावः॥जीवन्जातोयदिततोमृतःसूतकएवतु॥सूतकंसकलंमातुःपित्रादीनांत्रिरात्रकमितिवचनात्॥यावन्नछिद्यतेनालंतावन्नाप्नोतिसूतकं॥छिन्नेनालेततः

नि॰ पी॰

स्नानमात्रं कर्तव्यमिति सं वचनात् ॥ २ ॥ ॥ एवं कालविशेषे सद्य आशौचापवादमभिधाय वयोऽव

३ स्थाविशेषादपि तदपवादस्तृतीयवृत्तेनाह ॥ नामतः प्राक् नामकरणात्पूर्वं परेते उपरते बाले स्नानं स्नान

मात्रं न तन्निमित्तमाशौचमिति ॥ प्राक् नामकरणात्सद्यः शौचमिति शंखस्मृतेः ॥ नामकरणादूर्ध्वं द

शनजननतो दंतजननादर्वाक् परेते मृते अग्निदग्धे अहः ॥ एकरात्रं ॥ अहस्त्वदत्तकन्याबालेषु च-

स्नानं प्राङ्नामतोर्वाग्दशनजननतोऽहः परेतेऽग्निदग्धेऽदग्धे तत्रापि सद्यः
स्तदुपरि दिनमाब्दतश्चौलशून्ये ॥

विशोधनमिति याज्ञवल्क्यः ॥ अदग्धे तु सद्यः

शुद्धिः स्नानमात्रम् ॥ आदंतजन्मनः सद्य इति वचनात् ॥ तदुपरि दिनमाब्दतश्चौलशून्ये तदुपरि ३

दंतजननादूर्ध्वं यावत् त्रिवर्षं चूडाकरणरहिते परेते दिनमेकरात्रं ॥ आचौलान्नैशिकी स्मृतेति वचनात् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

कृतचौले त्रिरात्रमित्याह॥सचौले तु त्रिरात्रमिति॥सचौले कृतचौले परे ते त्रिरात्रम्॥निवृत्तचूडकानां तु त्रि
रात्राच्छुद्धिरिष्यत इति मनुवचनात्॥वर्षत्रयानंतरं यावदुपनयनं अविशेषेण त्रिरात्रमित्याह॥त्रिदिन
मितरथाप्याव्रतादिति॥इतरथा अकृतचौले अपि शब्दात्कृतचौले च संस्थिते तदुपरि वर्षत्रयादूर्ध्वं उपनयना
त्प्राक् त्रिरात्रं॥तथा चायमर्थः॥प्रथमेऽब्दे कृतचौलस्य यावदुपनयनं त्रिरात्रं॥वर्षत्रयादूर्ध्वं अकृतचौल-

**सचौले तु त्रिरात्रं त्रिदिनमितरथाप्याव्रताज्जात्यशौचं मातापित्रोस्तु पुत्रे त्रिदिनमदशने**
**सन्निधौ न ष्टचेष्टे॥३॥**

स्यापि यावदुपनयनं त्रिरात्रमिति रात्रमाव्रतोद्देशादिति वचनात्॥एवं वयोव
स्थाविशेषेणाशौचविशेषमभिधाय जात्याशौचमाह॥जात्याशौचमिति॥ ॥तदुपरि उपनयनानं
तरं जात्याशौचं दशाहादिकमिति यावत्॥ ॥दशरात्रमतः परमिति वचनात्॥ एवमवशिष-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



णाजातदंतमरणेमातापित्रोरपिसद्यःशौचादिप्राप्तौतदपवादमाह॥ ॥मातापित्रोस्तुपुत्रइत्यादिनाअ
दशनेऽजातदंतेपरेतेमातापित्रोस्त्रिरात्रमेव॥बालानामजातदंतानांत्र्यहाच्छुद्धिरितिकश्यपवचनात्
बैजिकादपिसंबंधादनुरुंध्यादघत्र्यहमितिस्मृत्यंतराच्च॥एतत्सर्वस्नानंप्राङ्नामतो वाकृदशनज
ननतोहःपरेतइत्यादिनोक्तम्॥सन्निधौशिशुमरणेवोदनव्यमित्याह॥सन्निधौनष्टचेष्टइतिसन्निः
धौसमीपेनष्टचेष्टायस्येतिमृतइतियावत्॥असन्निधौतुशिशुमरणेतिक्रांताशौचमेतन्नभवतीतिभा
वः॥तदुक्तंव्याघ्रपादमुनिना॥उपनीतेतुविषमंतस्मिन्नेवातिकालजमिति॥३॥ ॥अथचतुर्थवृत्तं
तत्रआद्यार्धपद्यस्यायमर्थः॥ ॥जन्मतऊर्ध्वंऊनद्व्यब्देअपूर्णद्विवर्षेअसंज्ञेगतसंज्ञेमृतइतियाव-
त्॥जनिकरःपिताजननीमाता॥सोदराःभ्रातरःएषांदशाहाशौचमित्येकःपक्षः॥गर्भस्थेप्रेतेमातु
र्दशाहं॥जातउभयोःकृतेनाग्निसोदराणामितिपैंग्यवचनात्॥पक्षांतरमाह॥यद्वेति॥अथवा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

भ्रात्रादिन्नयस्यत्रिरात्राशौचं अस्पृश्यत्वमेवाधिकम् ॥ सूतकं कर्मानधिकारित्वलक्षणं ॥ त्रिरात्रंसपिंडैः सहसमानमेवेतिभावः ॥ एतच्चपक्षद्वयं ॥ त्रिरात्रं दशरात्रंवाशावमाशौचमिष्यते ॥ ऊनद्विवर्षेउ भयोःसूतकंमातुरेवहीत्येतद्व्याख्यानसमयेविज्ञानेश्वराचार्यैःस्पष्टीकृतम् ॥ अथस्त्रीषुवयोव-

ऊनद्व्यब्देत्वसंज्ञेजनिकरजननीसोदराणांदशाहंयद्वास्पृ
श्यत्वमेवाधिकमिहविषयेसूतकंतुत्रिरात्रम् ॥ ॥

स्थाविशेषादाशौचविशेषमाविष्करोत्युत्तरार्धेन ॥ ॥ नामकरणादूर्ध्वंक्षौरकालादर्वाक् यावत्क्षौर कालं मृतासुस्त्रीषुकन्यासुत्रिपुरुषविषयेयावत्त्रिपुरुषंयोज्ञातिःसस्नानमात्रेणशुद्ध्येत ॥ अत्र

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्रिपुरुषविषयइत्यनेनकन्यानांसापिंड्यम्॥त्रिपुरुषम॥अप्र त्तानांतुस्त्रीणांत्रिपुरुषीविज्ञायतइतिवसिष्ठो
क्तमभिमतम्॥एतच्चसद्यःशौचम्॥अनूढायांतुकन्यायांसद्यःशौचंविधीयतआपस्तंबोक्तम्ज्ञेयं॥वाग्दा
नतोर्वाक्प्रथमंचूडाकरणादनंतरअन्हाएकेनैवदिवसेनज्ञातिःशुद्ध्येदितिपूर्वेणसंबंधः॥ अहस्त्वदत्त-

स्त्रीषुस्नानेनशुद्ध्येत्त्रिपुरुषविषयेज्ञातिराक्षौरकालादर्वाग्वाग्दानतोन्हा
त्रिभिरुपयमनाद्भर्तृगोत्रंस्वकंच॥४॥ ७ ७

कन्यासुबालेषुचविशोधनमितिस्मरणात्॥त्रिभिरुपयमनादिति॥वाग्दानादूर्ध्वंउपनयनाद्विवाहादर्वा
क्भर्तृगोत्रं परिणेतृगोत्रंस्वकंपितृगोत्रंचत्रिभिर्दिनैःशुद्ध्येत्॥इयंचशुद्धिः॥स्त्रीणामसंस्कृतानांतुत्र्य
हाच्छुद्ध्यंतिबांधवाः॥यथोक्तेनैवकालेनशुद्ध्यंतितुसनाभयइतिमनूक्तावेदितव्या॥४॥ ७ ५

॥ एवंचतुर्वर्णसाधारणीं शुद्धिमुक्त्वावर्णविशेषेण दशाहाशौचापवादं पंचमवृत्तपूर्वार्द्धेनाह ॥ जन्मनीति
जन्मनिजननाशौचेचउपेतः उपनीतः कृतोपनीतसंस्कारः उपेतएवऔपेतः तस्यमृत्यौउपनीतमरणेब्राह्म
णाद्याश्चत्वारोवर्णाः क्रमेणदशनिशादिकालमशुचयस्युः ब्राह्मणो दशाहं क्षत्रियोद्वादशाहं वैश्यः
पक्षंपंचदशाहं शूद्रोमासं पक्षद्वयमितिक्रमः उचितकृतपाकयज्ञद्विजशुश्रूषादिविहितकर्मानुष्ठान

जन्मन्यौपेतमृत्यावपिचदशनिशाद्वादशाहानिपक्षंमासंवर्णाः क्रमेणाशुचयउ
चितकृच्छूद्रजातिस्तुपक्षम् ॥ ॥ शीलः शूद्रः पक्षंपंचदशरात्रमेवाशुचिर्नतुमासं ॥ क्षत्रि
यस्यद्वादशाहानिविंशः पंचदशैवतु ॥ त्रिंशद्दिनानिशूद्रस्यतदर्धंन्यायवर्तिनइतिवचनात् ॥ ॥ इदा
नीमुत्तरार्द्धेनकुलसंबंधिपुरुषविशेषोपरमेदशाद्याशौचापवादमाह ॥ ॥ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वानप्रस्थइति॥ कुलजेस्ववंशेवानप्रस्थेतृतीयाश्रमिणियतौच चतुर्थाश्रमिणिषंढके क्लीबेचोपरमति उपरते आप्लुवः स्नानमात्रं शुद्धिकारणमिति यावत् योषिद्वोविप्रगुर्व्यैतद्रक्षणाय मृतवति दिनमहोरात्रमाशौचं॥ युध्यविध्येसाक्षाद्युद्धहतेतुसद्यः स्नानमात्रेणशुद्धिरितिपूर्वेणसंबंधः॥ युध्यघातेनकालांतरेमृतेतु दिनमेवशुद्धिहेतुः॥ ब्राह्मणार्थेविपन्नायेयोषितांगोगृहेपिवा॥ आहवेचाहतानांवाएकरात्रमशौचक

वानप्रस्थेयतौचोपरमति कुलजेषंढकेचाप्लुवस्याद्योषिद्गोविप्रगुर्व्थे
मृतवतिचदिनंयुद्धविद्धेतुसद्यः॥५॥

मितिस्मृतेः॥ उद्यतैराहवेशस्त्रैःक्षत्रधर्महतस्यच॥ सद्यःसंतिष्ठतेयज्ञस्तथाशौचमितिस्थितिरिति-
मनुवचनात्॥५ एतत्ज्ञातव्यमेवाशुद्धिनिमित्तमितिद्रढ्यति निर्णीतमनोज्ञानानंतरमुत्सर्गनोदशाद्या



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शौचप्राप्तौक्वचिद्देशकालादिभेदेनतदपवादमाह॥ ॥शावेतीतइतिषष्ठ्यन्तेन ॥ ॥ ॥

शावेशावाशौचेदशाहात्प्रभृति दशाहादिकेअतीतेअतिक्रांतेदशादिनानंतरंज्ञाते इतिवाच्यत्॥

विषयकइतियस्मिन्देशेमृतिस्तत्रैवज्ञाते॥ त्रिमासात्प्राक्प्रथममासत्रयेत्रिरात्रम्॥ त्रिमासानंतरम्

शावेतीतेदशाहात्प्रभृतिविषयकेप्राक्त्रिमासात्त्रिरात्रंपक्षिण्याषण्मासा
द्दिनमिहनवमात्स्यात्ततःस्नानमात्रं॥ आषण्मासात्षण्मासंयावत्पक्षिणी॥ पूर्वाप

रदिनाभ्यांयुक्तारात्रिरहर्द्वितिमित्तं॥आगामिवर्तमानाहर्युक्तायांनिशिपक्षिणीतिकोशात्॥ षण्मासादू

र्ध्वंयावन्नवमासपर्यंतंदिनमहोरात्रम्॥ ततोनवमासादूर्ध्वंस्नानमात्रंस्यादितिसंबंधः॥ मासत्रये

त्रिरात्रंस्यात्षण्मासेपक्षिणीतथा॥ अहस्तुनवमादर्वागूर्ध्वंस्नानेनशुध्यतीतिवृद्धवसिष्ठवचनात्

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



देशांतरे मृतिश्रवणे विशेषेण त्रिमासादावपि स्नानमेवेत्याह ॥ ॥स्नानं देशांतरस्थमिति ॥ ॥ देशांतरमृतं श्रुत्वा क्लीबे वैखानसे यतौ मृते स्नानेन शुध्यंति गर्भस्रावे च गोत्रिण इति स्मृत्यंतरात्त्व ॥ देशांतरलक्षणं तु आह बृहस्पतिः ॥ महानद्यंतरं यत्र गिरिर्वा व्यवधायकः ॥ वाचो यत्र विभिद्यंते तद्देशांतरमुच्यते ॥ देशांतरं वदंत्येके षष्टि योजनमायतम् ॥ चत्वारिंशद्वदंत्यन्ये त्रिंशदन्ये तथैव चेति ॥ एतस्यापवादमाह ॥

स्नानं देशांतरस्थे त्वथ पितृविषये देशकालाविशेषात्स्वं स्वं मातुः सपत्न्यास्त्रिदिनमिदमतिक्रांत्य शौचं समानं ॥ ६ ॥

अथ पितृविषय इति ॥ देशकालाविशेषात्सर्वदेशे सर्वकाले च पितुर्मातुश्च मरणे सुतानां स्वं स्वं स्वजातिविहितं दशाहादिकमेव ॥ पितृविषय इत्यत्र पिता च माता च पितरौ तौ विषयौ यस्येति समासः ॥ पितरौ चेन्मृतौ स्यातां दूरस्थोपि हि पुत्रकः ॥

For Private And Personal Use Only

श्रुत्वा ॥ह्निमासपद्क्षाहंसूतकीषमवोदिनिवचनात् ॥ अपरमातुर्विशेषमाह ॥ मातुःसपत्न्यास्त्रिरा
त्रमिति ॥ अपरमातरि मृतायांपुत्रस्यदेशकालाविशेषेणन वमा सादूर्ध्वंत्रिरात्रं ॥ तदुक्तं ॥ पितृपत्न्याम
पेतायां मातृवर्जं द्विजोत्तम ॥ संवत्सरेव्यतीतेतुत्रिरात्रमशुचिर्भवेदिति ॥ अत्रशावशब्दग्रहणेना
तिक्रांतेजननाशौचे शुद्धिर्नैवेतिसूचितं ॥ तथाचोक्तम् ॥ नाशुद्धिःप्रसवाशौचेव्यतीपातेषुदि
नेष्वपीतिदेवलेन ॥ एतदतिक्रांताशौचंसर्ववर्णसाधारणमित्याह ॥ इदमतिक्रांत्यशौचंसमान-
मिति ॥ इदंअतिक्रांतिरतिक्रमः ॥ तत्संबंध्याशौचंतत्समानंसर्ववर्णसाधारणमित्यर्थः ॥ प्रोषिते
कालशेषःस्यादशेषेत्र्यहमेवाहि ॥ सर्वेषांवत्सरेपूर्णेप्रेतेदत्वोदकंशुचिरितिवचनात् ॥ प्रोषितेमृते
सर्वेषांब्राह्मणक्षत्रियादीनांअविशेषेणकालविशेषःशुद्धिहेतुः ॥ अशेषेपुनरतिक्रांतेदशाहादौ
सर्वेषांत्र्यहाशौचमेव ॥ संवत्सरेपूर्णेयदिप्रोषितमरणमवगतंस्यात्तदासर्वेब्राह्मणादिस्नात्वा

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दसंदत्वाशुद्धिःस्यात् ॥ तुल्यंवयसिसर्वेषामतिक्रांतेतथैवचेतिव्याघ्रपादवचनात् ॥ ६ ॥ एवं॥
स्वकुलोत्पन्नमृताशौचमुक्त्वाकुलांतराश्रितानामपिमृतानामाशौचमाह॥ ॥सप्तमादिभिस्त्रि
भिर्वृत्तैः।पित्रोरित्यादिभिःपित्रोर्मातापित्रोर्गेहेसमूढाप्रसवमरणयोःसम्यकूढायाःपरिणीताया
प्रसवमरणेतयोःपित्रादिकानामेकरात्रत्रिरात्रेस्यातांयदापितृमातृगेहेपरिणीतकन्याप्रसूताम्

पित्रोर्गेहेसमूढाप्रसवमरणयोरेकरात्रत्रिरात्रेस्यातां।पित्रादिकानामथपि
तृमरणेव्यूढपुत्र्यास्त्रिरात्रम्॥ ताचाभवति॥तदातस्याःपित्रादिकानांक्रमादेकरात्र

त्रिरात्रे॥प्रसवेएकरात्रंमरणेत्रिरात्रमित्यर्थः॥अत्रपित्रोर्गेहइत्यनेनभर्तृगेहेप्रसूतायामृता ८
यावापितृपक्षाणांसर्वेषामाशौचाभावोदर्शितः॥तथाचविष्णुवचनं॥संस्कृतासुस्त्रीषुनाशौ

नंपितृपक्षेतत्प्रसवमरणेचेत्पितृगेहेस्यातांतदैकरात्रंत्रिरात्रंचेति ॥ अथपितृमरणेव्यूढपुत्र्यास्त्रिरात्रमि
त्यत्राथशब्देनाधिकारांतरसूचना ॥ व्यूढपुत्र्याःपरिणीतकन्यायाःपितृमरणेमातापित्रोर्मरणेत्रिरात्रं ॥
पित्रोरुपरमेस्त्रीणांमूढानांतुकथंभवेत् ॥ त्रिरात्रेणैवशुद्धिःस्यादित्याह भगवान्यमइति ॥ याज्ञव-
ल्क्यस्मरणात् ॥ प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोत्रियर्त्विक्सयाज्यस्वस्त्रीयेषुत्रिरात्रं ॥ उपनयनपूर्वकवे-

**प्रेतेष्वाचार्यमातामहदुहितृसुतश्रोतृयर्त्विक्सयाज्य**

दाध्यापकआचार्यःएकशाखाध्यापनक्षमःश्रोत्रियःऋत्विक्अध्वर्य्वादियज्ञकर्मकृत्सएवस
याज्यःयजमानसहितःशेषाःप्रसिद्धाः ॥ एतेषुमृतेषुत्रिरात्रं ॥ सोदकस्तूभयत्रेति ॥ सोदकःसमानोद
कःसप्तमपुरुषानंतरंसप्तपुरुषावसानःसउभयजाताशौचेमृताशौचेचत्रिदिवसमेवाशुचिरशुचिःस्यात् ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मथातद्बृहस्पतिः॥ अहं मातामाहाचार्यै श्रोत्रिये ब्रह्मनिर्मी वेदिति॥ तथा॥ मन्चेताश्च॥ मृतेनर्त्विज-
याज्ये च त्रिरात्रेण विशुध्यतीति॥ वृद्धयाज्ञवल्क्योपि॥ संस्थितेपक्षिणींरात्रिंदौहित्रेभगिनीसुते॥ सं

स्कृतीयेपुत्रिरात्रंत्रिदिवस मशुचिःसोदकस्तूभयत्र॥ ७॥

स्कृतेतुत्रिरात्रंस्यादेवंधर्मोव्यवस्थितइति॥ मनुरपि॥ जन्मन्येकोदकानांतुत्रिरात्राच्छुद्धिरिष्यते ९
॥शवस्पृशोविशुध्यंति त्र्यहान्तृदकदायिनइति॥ ७॥ ७ ॥ ७ ॥ ७ ॥ ७॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥अथास्मद्वृत्तेमाह॥ ॥पक्षिण्याशौचमिति॥ ॥ऋत्विगादयोभागिनेयांताः प्रसिद्धाः तेषांप्रयाणे मृत्यावतियावत्॥ मातामह्यांचविरतायांपित्रोःस्वसरिमातृष्वसरिपितृष्वसरिचविरतायांमातुळे चविरतेमातुलान्यांमातुळपत्न्यांचविरतायांपक्षिणीआशौचकारणम्॥ अथोसज्योतिरिति॥ स्वविषयनृपतौस्वदेशाधिपतौनष्टेमृतेग्रामनाथेचनष्टेसज्योतिरेवकालःशुद्धिहेतुः॥समानंज्योतिरादित्यो

पक्षिण्याशौचमृत्विक्दुहितृसुतसहाध्यायिबंधुत्रयांतेवासिश्वश्रूस्वमित्रश्वशुरभगिनिकाभागिनेयप्रयाणे॥

नक्षत्रंवायस्मिन्सज्योतिः ज्योतिर्जनपदेतिसूत्रेणसमानस्यसः॥ दिवानष्टेयावत्सूर्यदर्शनंअशुद्धिः नक्षत्रदर्शनाच्छुद्धिः॥ रात्रिनष्टेतुरात्र्यवसानपर्यंतमेवाशुद्धिःसूर्यदर्शनाच्छुद्धिरित्यर्थः॥ अत्रयेषांपूर्ववृत्तेत्रिरात्रमुक्तंतेषांपुनःपक्षिणीक

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



कथनंदेशकालादिभेदतोव्यवस्थापनीयम् ॥ एतस्यपक्षिण्यभिधानस्यश्वशुरयोश्चभगिन्यांमातु-
लान्यांचमातुले॥ पित्रोःस्वसरितद्वच्चपक्षिणींक्षपयेन्निशामिति॥ तथा ॥ मातुलेश्वशुरेमित्रे-
गुरोगुर्वंगनासुच॥ आशौचंपक्षिणीरात्रिमृतामातामहीयदि॥ तथाच॥ पक्षिणीमसपिंडेयोनि

मातामह्यांचपित्रोःस्वसरिचविरतेमातुलेमातुलान्यांचाथोसज्योतिरेवस्वविषयनृपतौग्रामनाथेचनष्टे॥८॥

संबंधेसहाध्यायिनीचेत्यादिवचना
न्निर्मूलं॥अथसज्योतिरेवेत्यस्य॥ प्रेतेराजनिसज्योतिर्यस्यस्याद्विषयेस्थितिरितिमनुवचनंमूलं॥ग्रा
मेश्वरेकुलपतौश्रोत्रियेवातपस्विनि॥शिष्येपंचत्वमापन्नेशुद्धिर्नक्षत्रदर्शनादिति॥ इतियाज्ञवल्क्यव
चनंमूलं॥८॥ १०

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथनवमंवृत्तमाह ॥ ॥ शिष्येति ॥ ॥ एकदेशाध्यापकउपाध्यायः ॥ अनूचानोंगानामवक्ता ॥ सगोत्रश्चतुर्दशपुरुषानंतरंसप्तपुरुषावसानःइतरत्स्पष्टम् ॥ एतेषुशिष्यादिषुप्रमीतेषुएकरात्रमहोरात्रमाशौचमितिशेषः ॥ तथास्वगृहपरमृतोमातुलेचैकरात्रम् ॥ तथासब्रह्मचारिणिचैकरात्रम् ॥ एकाचार्योपनीतःसब्रह्मचारीतस्मिन्मृतेसतित्रिरात्रिमहोरात्रमाशौचमिति ॥ गुर्वंतेवास्य

**शिष्योपाध्यायबंधुत्रयगुरुतनयाचार्यभार्यासगोत्रानूचानःश्रोत्रियेषुस्वगृहपरमृतौमातुलेचैकरात्रम् ॥**

नूचानश्रोत्रियेषुचेति ॥ याज्ञवल्क्यस्मरणात् ॥ बंधुत्रयग्रहणेनात्मबंधवःपितृसंबंधवोमातृसंबंधवश्चोपगृह्यंते ॥ बंधुत्रयलक्षणंत्वित्थं ॥ आत्मपितृष्वसुःपुत्रा आत्ममातृष्वसुःसुताः ॥ आत्ममातुलपुत्राश्चविज्ञेयाआत्मबांधवाः ॥ १ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



पितुःपितृष्वसुःपुत्राःपितुर्मातृष्वसुःसुताः॥ पितुर्मातुलपुत्राश्चविज्ञेयापितृबांधवाः॥ २॥ मातुः-
पितृष्वसुःपुत्रा मातुर्मातृष्वसुःसुताः॥ मातुर्मातुलपुत्राश्चविज्ञेयामातृबांधवाः॥ ३॥ विज्ञानेश्व
राचार्यैर्व्याख्यातत्वात्॥ त्रिरात्रमाहुराशौचमाचार्येसंस्थितेसति॥ तस्यपुत्रेचपत्न्यांचदिवारात्रमि
तिस्थितिरितिमनुस्मरणात् अहमेकोदकानांतुगोत्रजानामहःस्मृतइतिजाबालिवचनात्॥ असपिंडेषुस्व

रात्रिंसब्रह्मचारिण्यथतुकथमपिस्वल्पसंबंधयुक्तेस्नानंवासोयुतंस्या
दिदमपिसकलसर्ववर्णेषुतुल्यम् ॥ ९॥ वेश्मनिमृतेष्वेकरात्रमितिविष्णुस्मरणात्

अत्रयेषांपुनर्गृहणंतेषामसन्निधानादिनाव्यवस्थाद्रष्टव्या॥ श्रोत्रियस्यसमानग्रामीणस्येति ११
व्याख्येयम्॥ एकाहंसब्रह्मचारिणिसमानग्रामीणेचश्रोत्रियइत्याश्वलायनवचनात्॥ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥अथतुकथंचनापिस्वल्पसंबंधयुक्तेस्नानंवासोयुतंस्यादित्यत्र अथशब्दोधिकारांतरसूचनार्थः कथमपि-केनापिप्रकारेणस्वल्पेनापिसंबंधेनसंबंधिनिभगिन्यादौसंस्थितेस्नानंवासोयुतंसचैलंस्नानंनशक्रैव स्यात्॥नान्यदित्यर्थः॥ तदुक्तम्॥याज्ञवल्क्यमुनिना॥ भगिन्यांसंस्कृतायांतुभ्रातर्यपिचसंस्कृते॥मित्रेजामातरिप्रेतेदौहित्रेभागिनीसुते॥शालकेतत्सुतेचैवसद्यःस्नानेनशुध्यतीति॥इदमप्युक्तंसकल

बत्थाशौचस्यमध्येत्परमपिसमंस्वल्पकंवासजातिप्रेतेजात्यंतरंवायदिभ
वतितदापूर्वशेषेणशुध्यिः॥ माशौचंसर्ववर्णेषुतुल्यम्॥साधारणमितिस्पष्टम्॥१॥

॥इदानीमाशौचमध्येआशौचांतरसन्निपातेतन्निर्णयंदशमवृत्तेनाह॥ ॥बत्थाशौचस्येति॥ बत्थाशौचस्यमध्येपूर्वप्रवृत्ताशौचस्यमध्येयदिहपुनरपरंअन्यदपिसमंदशाहाशौचमध्येदशाहमाशौचं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्वल्पकं वा त्रिरात्रादिकमाशौचं वा सजातिसमानजातीयम् ॥ जाताशौचमध्ये जाताशौचं मृताशौचमध्ये
मृताशौचं भवति ॥ तदा पूर्वशेषेण शुद्धिः ॥ समं स्वल्पकं वेत्यनेन स्वल्पाशौचमध्ये पतितस्य दीर्घाशौच
स्य न पूर्वेण शुद्धिरित्यादि वेदितव्यम् ॥ तदुक्तमुशनसा ॥ स्वल्पाशौचस्य मध्ये तु दीर्घाशौचं भवेद्यदि ॥ न पूर्वेण
विशुद्धिः स्यात्तत्कालेनैव शुध्यतीति ॥ प्रेतेजात्यंतरं वा ॥ तथा प्रेते प्रेताशौचमध्ये यदि जात्यंतरं विजा
तीयं जननाशौचं भवति ॥ तदानुपूर्वेण मृताशौचेनैव शुद्धिः ॥ एतेन जाताशौचमध्ये संजातस्य प्रेताशौ
चस्य न पूर्वेण शुद्धिरित्यपि ज्ञापितम् ॥ शावेन शुध्यते सूतिर्न सूतिः शावशोधिनी इति स्मरणात् ॥ द्वा
भ्यां तद्रात्रिशेषे रात्रिमात्रावशेषे यद्याशौचांतरं पूर्वोक्तं भवेत् ॥ तदा द्वाभ्यामपरदिनाभ्यां शुद्धिः ॥ त्रिभि
रपरदिनैर्यामिनीयामशेषे इति ॥ यामिन्या यामः स्तुरीयप्रहरस्तन्मात्रावशेषे तुरीयप्रहरशेषे त्रिभिर
परदिनैः पूर्वशौचादधिकैस्त्रिभिरुत्तरदिवसैः शुद्धिर्न पूर्वाशौचशेषमात्रेणेति भावः ॥ अयमर्थः ॥ १२

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

शन्निमात्रावशिष्टेपूर्वाशौचेयद्याशौचांतरंसन्निपतेत्तर्हिपूर्वाशेषंसमाप्यानंतरंद्वाभ्यांरात्रिभ्यांशुद्धिःप्रभा
तेपुनस्तस्यांरात्रेःपश्चिमेयामेजननाद्याशौचांतरसन्निपातेतिसृभिःशुद्धिःनपुनस्तच्छेषमात्रेणरा
त्रिशेषेसतिद्वाभ्यांप्रभातेतिसृभिःस्मृतेतिगौतमवचनात्॥ ॥पित्रोर्विशेषमाह॥ ॥नेवाशौचे
नपित्र्यमिति॥अन्याशौचमध्येपतितंयत्पित्र्यंमातृपितृसंबंधिआशौचंतत्पूर्वाशौचशेषेणनेवशु

द्वाभ्यांतद्रात्रिशेषेत्रिभिरपरदिनैर्यामिनीयामशेषे ॥

द्ध्येत्॥पितुरुपरमेमातुर्वोपरमेतद्दशाहमेवाशुद्धिरितिभाव॥तयोर्मातृपितृविरतिनिमित्तयोःपर
स्परंसन्निपातेपिनपूर्वशेषेणशुद्धिःकिंतुमात्राशौचमध्येपतितस्यापिपित्राशौचस्यनसंकोचः॥
मातुर्विशेषमाह॥पितुरुपशमनेपक्षिणीमातृमृत्याविति॥पितुरुपशमनेपित्राशौचमध्येमातृमृ

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



त्योर्मातुर्मरणेजातेसतिपक्षिणीअधिकाऽशुद्धिर्हेतुर्नतुयावत्दशाहमितिभावः॥ अयमर्थः॥ मातरि
पूर्वंमृतायांतन्निमित्ताशौचमध्येयदिपितुरुपरमःस्यात्॥तदानपूर्वशेषेणशुद्धिः॥किंतुपितुःप्रया
णनिमित्ताशौचकालेनैवशुद्धिःकार्या॥तथापितुःप्रायणनिमित्ताशौचमध्येमातरिस्वर्यातायाम

नैवाशौचेनपित्र्यंपितुरुपशमनेपक्षिणीमातृमृत्यौ॥१०॥

पिनपूर्वशेषमात्राच्छुद्धिः॥किंतुपूर्वाशौचंसमाप्योपरिपक्षिणीक्षपेदिति॥तथाचस्मृतिः॥मातर्यग्रे
प्रमीतायामशुद्धौम्रियतेपिता॥पितुःशेषेणशुद्धिःस्यान्मातुःकुर्यात्तुपक्षिणीमिति॥१०॥ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥अथैकादशवृत्तंसर्वेत्विति॥ ॥सर्वमिदमाशौचंयद्याशौचांतर्मध्यएवविदितंज्ञातंभवति॥तदाशेष
मात्रेणशुद्धिः॥दशाहमध्येयावंत्यवशिष्टदिनानितावन्मात्रेणशुद्धिर्नतुज्ञानदिनादारभ्येत्यर्थः॥एवं
त्रिदिनाद्याशौचेपिद्रष्टव्यम्॥प्रोषितेकालशेषस्यादितियाज्ञवल्क्यस्मरणात्॥दाहाद्वादाहिताग्नेरिदमा
शौचंआहिताग्नौसाग्निकेमृतेदाहाद्दाहान्दाहदिवसतोदशदिनंकुर्यात्॥नपुनर्मरणदिवसतः॥अन्यत्र

**सर्वत्वाशौचमंतर्यदिविदितमिदंशेषमात्रेणशुद्धिर्दाहाद्दाहादाहिताग्नेर्मरण**
**दिवसतोन्यत्रकुर्याद्दशाहम्॥**

अनाहिताग्नौतुमरणदिवसतः कुर्यान्नतुदाहदिवसत॥
अनग्निमतउत्क्रांतेःसाग्नेःसंस्कारकर्मणइतिश्रवणादाहिताग्नौपितरिदेशांतरमृतेतत्पुत्रादीनांआ
संस्कारात्संध्यादिसर्वलोपोनास्तीत्यनुसंधेयम्॥साग्नेःसंस्कारकर्मणःशुद्धिःसंचयनंदाहान्मृता

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हस्तेयथाविधीत्यंगिरोवचनात् ॥ आशौचांतेयत्कृत्वाशक्तिर्भवतितदाह ॥ पूर्णेस्नात्वेति ॥ पूर्णेआशौ
चेसचैलंसवस्त्रंयथाभवतितथास्नात्वाविहितकृतौवेदोक्तस्वाधिकारिकेदैवपितृकार्येअर्हकायो-
ग्याःस्युःज्ञातयइतिशेषः॥ ॥सूतिकायाविशेषमाह॥ सूतिका त्विति॥सूतिकातुपुनस्त्रिंशद्रात्रं

पूर्णेस्नात्वासचैलंविहितहितकृताबर्हकाःसूतिकातुत्रिंश
द्रात्रंनयोग्यास्मरपितृकरणेविंशतिंपुत्रसूस्त ॥११॥ ॥

विहितहितकृद्वौपितृस्मरकार्येयोग्यानशक्त्यानभवतीत्यर्थः॥एतत्कन्याप्रसवे॥पुत्रप्रसवेतुविशेषमा
ह॥ विंशतिंपुत्रसूस्त्विति॥पुत्रजननीतुविंशद्रात्रमुभयकार्येयोग्यानभवतीत्येवान्वयः॥सूतिकांपु
त्रवतीं॥विंशद्रात्रेणकर्माणिकारयेन्मासेनस्त्रीजननीतिपैठीनसिस्मरणात्॥११॥ ॥ ७



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ ॥अथद्वादशाहत्तंनिर्हृत्यान्यमिति ॥ ॥ निर्हृत्येत्यत्र अन्यसमसपिंडंसवर्णंनिर्हृत्यदिवसमशुचिर्भव
तिएतदहोरात्रमतद्गृहवासिनोऽतदन्नभोजिनश्चज्ञेयम् ॥ तद्गृहवासिनस्तदन्नखादतस्त्रिरात्रंतदन्नाशि
नस्त्वदशरात्रमितिज्ञेयम् ॥ तथाचमनुः ॥ असपिंडंद्विजंप्रेतंविप्रोनिर्हृत्यबंधुवत् ॥ विशुध्यतित्रिरात्रेणमा
तुराप्तांश्चबांधवान् ॥ यद्यन्नमत्तितेषांतुदशाहेनैवशुध्यति ॥ अन्नदन्नमन्हैवनचेत्तस्यगृहेवसेदिति ॥

निर्हृत्यान्यंप्रमीतंदिवसमशुचिकोऽथासवर्णंतदुक्ताशौचोथानाथमाद्यक्र
तुशतफलभागापूर्वेनैवशुध्येत् ॥ अथासवर्णस्नेहवशान्निर्हृत्यतदुक्ताशौचः यज्जातीय
स्यनिर्हणंतस्येवउक्तमाशौचंयस्यसः तथाहिब्राह्मणश्चेच्छूद्रंनिर्हरेत्तदामासमशुचिः ॥ तथाशूद्रश्चेत्ब्रा
ह्मणंतदादशाहमित्यादिज्ञेयं ॥ एवमवरश्चेद्वर्णः पूर्ववर्णमुपस्पृशेत्पूर्वोवावरंतत्रतत्तच्छवोक्तमाशौचमिति

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



वचनात्॥अन्ननिर्हरणोपस्पर्शशब्दाभ्यांप्रेतवहनंलक्ष्यते॥ ॥एतस्याप्रवादमाह॥ अथानाथमिति॥
अनाथंप्रेतंनिर्हृत्याश्वक्रतुशतफलभाग्भवेत्॥ आद्यक्रतुर्ज्योतिष्टोमः आप्लुवेनेवशुद्ध्यंत॥ स्नानमात्रे
णशुद्धोभवेत्॥एवकारेणस्नानानंतरमाशौचनिवृत्तिः प्रतिपादिता॥ यथाहपराशरः॥ अनाथंब्राह्मणंप्रे



नीत्वोपाध्यायमातापितृपरमगुरून्ब्रह्मचारीनदोषी

तंयेवहंतिद्विजातयः॥ पदेपदेयज्ञफलंमानुपूर्व्याल्लभंतिते॥ नतेषांअशुभंकिंचित्पापंवाशुभकर्मणां॥
जलावगाहनात्तेषांसद्यःशौचंविधीयते॥ ॥अथब्रह्मचारिणोविशेषमाह॥ ॥नीत्वेति॥उपा



For Private And Personal Use Only

ध्यायादीन्नीत्वानिर्हत्यब्रह्मचारीनदोषीदोषभाङ्नभवेदिति ॥ब्रह्मचारीव्रतान्नभ्रश्यतइतिच॥ आचा र्यमातापितृउपाध्यायान्निर्हृत्यापिव्रतीभवेत्॥ ब्रह्मचारीव्रतीव्रत्येवनपुनस्तस्यव्रतभ्रंशःव्रतीतियाज्ञ वल्क्यवचनात्॥ ॥अन्यनिर्हरणेदोषमाह॥ ॥ तेभ्योन्यमिति॥ तेभ्यउपाध्यायादिभ्योऽन्यंनिर्हृतः

तेभ्योन्यंनिर्हृतोस्यव्रतमपिविततंभ्रश्यतेवश्यमेव ॥ १२॥

अन्यनिर्हरणंकुर्वतोऽस्यब्रह्मचारिणःविततंविस्तृतंचिरार्जितमितियावत्॥व्रतमप्यवश्यंभ्रश्यति॥ब्रह्म चार्यात्च्युतोभवतीत्यर्थः॥ब्रह्मचारिणःशवनिर्हरणनिमित्तकर्मणोव्रतान्निवृत्तिरन्यत्रमातापित्रोरितिवसि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ष्ववचनात्॥१२॥ ॥एवंनिर्हरणाशौचमुक्त्वाअनुगमनाशौचंनयोदशश्लोकेनाह॥ तुल्येति॥ तुल्योत्कृष्टानु
यानेब्राह्मणस्यब्राह्मणानुयानेएवंक्षत्रियादेरपिस्वस्ववर्णानुयानंतुल्यानुयानंउत्कृष्टानुयानंतुक्षत्रियस्य-
ब्राह्मणानुयानंवैश्यस्यब्राह्मणक्षत्रियानुयानंतथाशूद्रस्यद्विजातियानुगमनंचैव्चतत्त्वतुल्योत्कृष्टानुयान
तस्मिन्कृतेवसनसहितकःसवस्त्रःअंभसिनद्यादौआप्लुत्यस्नात्वावन्हिंस्पृष्ट्वाआज्यंघृतंप्राश्यविशुध्ये

तुल्योत्कृष्टानुयानेवसनसहितकोंभस्यवाप्लुत्यवन्हिंस्पृष्ट्वाज्यंप्राश्यशुध्ये
दर्धदिनमशुद्धिर्हीनवर्णानुयाने॥

त्॥ प्रसिद्धमेतद्वाक्यानुकथनं॥

तत्रच॥ अनुगम्येच्छयाप्रेतंज्ञातिमज्ञातिमेववा॥ स्नात्वासचैलंस्पृष्ट्वाग्निंघृतंप्राश्यविशुध्यतीतिमनु १६
वचनंमूलंवेदितव्यम्॥ हीनानुगमनाशौचमाह॥ अर्धदिनमिति॥ ब्राह्मणादेःक्षत्रियाद्यनुयानेअनु

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

गंताब्राह्मणादिर्दिनमहोरात्रमशुद्धिर्भवतीतिशेषः॥ पक्षिण्येकांतरेपि॥ एकांतरानुयानेब्राह्मणस्यवै-श्यानुयानेक्षत्रियस्यचशूद्रानुयानेपक्षिणीअशुद्धिनिमित्तंभवेत्॥ द्व्यंतरत्वेत्रिरात्रम्॥ द्व्यंतरत्वेब्राह्मणस्यशूद्रानुयानेत्रिरात्रंअनुगंताब्राह्मणोअशुचिर्भवेदितिसंबंधः॥ त्रिरात्रानंतरंकृत्यमाह॥ त्रि-

**पक्षिण्येकांतरानुव्रजन्नहभवेद्व्यंतरत्वेत्रिरात्रंकृत्वास्नात्वासुनद्यामसु**
**यमनशतंसर्पिराशंचकुर्युः ॥१२॥**

रात्रंकृत्वासुनद्यांसुत्तमजलेस्नात्वाअसुयमनंप्राणायामः तच्छतंकुर्यात्॥ तदनंतरंसर्पिराशंघृतप्राशनंचकुर्युः॥ एवंशुद्धाभवंतीत्यर्थः॥ तथाचपराशरः॥ प्रेतीभूतंतुयःशूद्रंब्राह्मणोज्ञानदुर्बलः॥ अनुगच्छेन्नीयमानंसत्रिरात्रेणशुध्यति॥ त्रिरात्रेतुततस्तीर्णेनदींगत्वासमुद्रगाम्॥ प्राणायामशतंकृत्वाघृतंप्राश्यविशुध्यतीति ॥ १२ ॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ अथाधिकारिविशेषेणाधिकारविशेषं चतुर्दशवृत्तेनदर्शयति ॥ ॥ तातेति ॥ ॥ तातः पिता अंबा माता ।
आचार्य उपनीय वेदाध्यापकः एभ्यः अनलजलतिलान् ददातीत्यनलजलतिलदः ॥ एवंविधो ब्रह्मचा
री तदीयाशौचः तदीयाशौचवान् भवति ॥ तदीयाशौचः शत्याशत्यो भवतीत्यर्थः ॥ अन्येभ्यस्त्वतद्दः अ

तातांबाचार्यकेभ्योनलजलतिलदो ब्रह्मचारी तदीयाशौचोन्येभ्यस्त्वत
द्दः पुनरुपनयनं चाधिकं कारयेत्तु ॥

नलजलतिलदः तदीयाशौचः सन्नाशौचांते पुनरुप
नयनमधिकं कारयेत् ॥ ततः शत्यो भवतीत्यभिसंधिः ॥ एतच्च ॥ आचार्यपित्रुपाध्यायान्निर्हृत्या
पि व्रती व्रती ॥ संकटान्न च नाश्नीयान्न च तैः सह संविशेत् ॥ इत्येतद्व्याख्यानमिताक्षरायां स्पष्टीकृतं ॥ १७

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अन्येतु ॥ अन्येब्रह्मचारिव्यतिरिक्ताः अज्ञातिकेभ्योयद्यनलजलतिलान्ददतिनदातस्मयुक्ताशक्भाः स्युः ॥
तदाशौचभाजः स्युः तदीयाशौचेनैवाशौचवंतः स्युरितितात्पर्यम् ॥ अधिकं कृच्छ्रत्रयंचापिकुर्युः ॥ ततः शुद्धा

अन्येत्वज्ञातिकेभ्योयदिददतितदातस्मयुक्ताशक्भाः स्युः कुर्युः कृच्छ्रत्रयंवा
धमदहनविधौतंतमेवाप्नुवंति ॥ २८ ॥

भवंतीत्यर्थः ॥ अधमदहनविधौयदा अधमदाहकास्तदानंतरमेवभावंप्राप्नुवंति ॥ तेनतेनाधमेनतु-
ल्याभवंतीत्यर्थः ॥ एतच्चनोत्तमस्तर्पयेन्नीचंइत्यनंतभट्टैर्निर्णीतम् ॥ २८ ॥ ७. ७

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॥अथदेशांतरमृतस्यशरीरालाभेदाहविधिंपंचदशाद्धेनाह ॥ ॥पालाशीति॥ ॥आहिताग्नेःसाग्निक
स्यास्थिभिःप्रतिकृतिंकृत्वा॥तदलाभेशौनकादिगृह्योक्तविधिनापालाशीपालाशनिर्मितांप्रतिकृतिंकृत्वा
तांचदग्ध्वाज्ञातयोदशाहाद्याशौचास्युः॥तदितरनृणांअनाहिताग्नीनांपालाश्यादिप्रतिकृतिंकृत्वादग्ध्वा

पालाशीमाहिताग्नेःप्रतिकृतिमथवास्थीनिदग्ध्वादशाहाद्या
शौचाज्ज्ञातयःस्युस्तदितरनृणांस्त्रीण्यहान्येवकुर्युः॥ ॥

ज्ञातयस्त्रीण्यहानित्रिदिनमाशौचंकुर्युः॥अत्रोभयत्रमूलंवसिष्ठवचनम्॥आहिताग्निश्चेत्प्रवसन्म्रि
येतपुनःसंस्कारंकृत्वाशववदाशौचं॥ ॥अनाहिताग्नेस्त्रिरात्रमिति॥सपिंडैर्जलसंमिश्रैर्दग्धव्यश्चतथा १८

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

पिना॥ असौस्वर्गायलोकायस्वाहेत्युक्कासबांधवैः॥ एवंपर्णशरंदग्ध्वात्रिरात्रमशुचिर्भवेदितिच॥ अन्योविप्रादि
अन्यो अस कुल्योदशाहाद्याशौचवतांगृहे अदनं अन्नं सकृदेकवारमपि अदन् भुंजन् तावदाशौचकृत॥
तेषांयावत्कालमाशौचंतावदाशौचकृत् अशुचिः स्यात्॥ अंतेआशौचांतेतद्व्रतमपिचरेत्॥ आशौचांते

अन्योविप्राद्यशौचेसकृददन्नमदन्स्तावदाशौचकृत्स्याद्यावत्ते
षांतदंतेव्रतमपिचचरेद्रोदनेत्वेकरात्रम्॥ १५॥ ॥

यस्ययद्व्रतंविहितंतदपिचरेत्कुर्यात्॥ उभयत्रदशाहानिकुलस्यान्नंनभुंजीतइतिनिषिद्धाचरणादितिभाव
॥रोदनेत्वेकरात्रमिति॥ प्रेतस पिंडैःसहरोदनेकृतेएकरात्रमाशौचकृत्स्यात्॥ तथाचपारस्करः॥ मृतस्यबां
धवैःसार्द्धंकृत्वातुपरिदेवनं॥ वर्जयेत्तदहोरात्रंदानंश्राद्धादिकर्मचेति॥ १५॥ ७ ७

॥ ॥अथाशौचशब्देनाकृचित्त्वमित्विनास्पृशत्वस्यप्रतीतौरुद्भूयाजातायांजन्माशौचेतदपवादंषोडशवृत्ते-
नाह॥ ॥जन्मनीति॥ जन्मनिमित्तास्पृश्यताकुलभुवांसपिंडानांसोदकानांचनोभवति॥ किंतु॥ मातृव
र्जंमातुःसूतिकायास्तुअस्पृश्यताभवत्येवेत्यर्थः॥ पितुर्विशेषमाह॥स्नानादूर्ध्वंसचेलादिति॥सचेल

जन्मन्यस्पृश्यतानोभवतिकुलभुवांमातृवर्जंपितुस्तुस्ना
नादूर्ध्वंसचैलादथनिधनकृताशौचकेप्येत्रिभागे॥ ॥

स्नानादूर्ध्वंपितुरस्पृशतानोभवतीतिपूर्वेणसंबंधः॥तथाचसंवर्तः॥जातेपुत्रेपितुःस्नानंसचेलंतुवि १९
धीयते॥माताशुद्ध्येद्दशाहेनस्नानात्तुस्पर्शनंपितुरिति॥ अंगिराश्च॥ सूतकेसूतिकावर्ज्यंसंस्पर्शोन

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

निषित्स्यतइति॥ मृताशौचेप्यस्पृश्यत्वसंकोचनमाह॥ अथेति॥ निधनकृताशौचकेमरणनिमित्ताशौच
केअत्येत्रिरात्रादिकेत्रिभागेत्रिधाविभक्तेपूर्वांशस्योपरिप्रथमांशादुपरितनंयद्भागद्वयंतत्रास्पृश्यतानो

पूर्वांशस्योपरीत्थंमहतिच्चयदिसंचायनंवृत्तमासी

भवनीतिसंबंधः॥ इत्थं महतिचदशाहादिकेपि एवमेक्यादिसंचायनंअस्थिसंचयनंप्रथमादि
नएववृत्तमासीत्तदेवायंविभागलक्षणप्रकारः॥ नोचेद्यदित्नुनतत्कृतंस्यात्तर्हितस्योपरिष्टादस्थिसंचय

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नानंतरंदिनानित्रिधाविभज्यप्रथमभागंत्यक्त्वाउत्तरभागद्वये ऽस्पृश्यतानोभवति॥ पूर्वभागेतुभवत्येवे
नितात्पर्यम्॥ स्वाशौचकालाद्विज्ञेयंस्पर्शनंतुत्रिभागतः॥ शूद्रविट्क्षत्रविप्राणांयथाशास्त्रंप्रणोदितमि
तिस्मरणात्॥ तथा॥ दशाहादित्रिभागेनकृतेसंचयनेक्रमात्॥ अंगस्पर्शनमिच्छंतिवर्णानांतत्वदर्शिनः
त्रिचतुःपंचदशभिःस्पर्शावर्णाःक्रमेणात्विति देवलस्मरणात्॥ अथतु॥ अथेत्याधिकारांतरेगृहजयोःस्व

न्नोचेत्तस्योपरिस्यादथतुगृहजयोर्दासयोरापुवोर्ध्वं॥१८॥
॥अन्नेनोपात्तयोस्त्वाश्रजनिचरणाद्त्तदासादिकानां

ह्नोसन्नयोर्दासीदासयोरापुवोर्ध्वंस्नानानंतरंअस्पृश्यतानोभवतीतिसंबंधः॥१८॥ ॥दासभेदेनास्पृ २०
श्यत्वकालभेदंसप्तदशावृत्तपूर्वार्द्धेनाह॥ अन्नेति॥ अन्नेनोपात्तयोरन्नदानेनगृहीतयोर्दासीदास

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

यो॰तुपुनःत्रिरजनिचरणात्त्रिरात्रगमनादूर्ध्वंअस्पृश्यतानोभवतीतिपूर्वश्लोकगनेनान्वयःतुशब्देनपूर्व
स्माद्विशेषउक्तः॥दत्तदासादिकानांस्वाम्याशौचाहसंख्यासमदिनगमनादूर्ध्वंअस्पृश्यतानोभवतीत्येवा
न्वयः॥आदिशब्देनद्रव्यादिक्रीतानांसंग्रहः॥स्वामिनोयान्याशौचदिनानितेषांसंख्ययासमदिनानाम-
तिक्रमणादूर्ध्वमित्यर्थः॥अन्यत्तुसूक्तंदासस्यस्वसाम्यकर्मण्येवयोग्यतानतुकर्माधिकारेतथास्मृतिकाया

२ स्वाम्याशौचाहसंख्यासमदिनगमनादूर्ध्वमन्यत्तुसूक्तं ॥

दास्याःस्वप्रसवनिमित्तमस्पृश्यत्वंमासमित्येतत्सूक्तंस्पष्टं॥दासायाशौचेसद्यःशत्स्येत्॥सद्यःस्पृश्यो
गर्भदासोभक्तदासस्त्र्यहाच्छुचिरितिस्मृति॥तथादासीदासश्चसर्वोवैयस्यवर्णस्ययोभवेत्॥तद्वर्ण-
स्यभवेच्छौचंदास्यामासंतुसूतकमित्यंगिरोवचनंमूलम्॥इदानींजाताशौचेजननिनिमित्तंयत्कार्यंन

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यस्मिन्नुत्तरार्द्धेनाह जातेपत्ये अपत्येजातेतन्मंगलार्थेषुनस्यापत्यस्यमंगलार्थंकर्मसूतस्मिन्नहनितस्यामेव
निशिचयोग्याइत्यन्वयः ॥ ॥अयमर्थः॥ ॥अपत्यमंगलार्थानिकर्माणियस्मिन्दिनेयस्यांचनिशिविहितानिते
ऽप्रथमदिनादिसाध्येषुकर्मसूसर्वेसूतकिनस्तस्मिन्कालेयोग्याअधिकारिणोभवंतीति ॥तथाचव्यासवाक्यं
॥सूतिकायासनिलयाजन्मदानामदेवताः॥तासांयागनिमित्तार्थंशुद्धिर्जन्मनिकीर्तिता॥ प्रथमदिवसेषष्ठेद

जातेपत्येतुतस्मिन्नहनिनिशिचतन्मंगलार्थेषुयोग्याःसर्वाशौचंसदानोभइति
यतिवनिब्रह्मचर्यस्थितानाम्॥ १७॥ शमेचैवसर्वदा॥ त्रिष्वेतेषुनकुर्वंतिसूतकंपुत्रजन्म
नीति॥उक्ताशौचस्यसर्वपुरुषविशेषेऽपवादमाह॥ सर्वाशौचमिति॥ एतत्सर्वमाशौचंसदासर्वकालंयतिः
सन्यासीवनीवानप्रस्थःब्रह्मचर्यस्थितउभयविधौब्रह्मचारीनैष्ठिकोपकुर्वाणश्चएतेषांनोभवति ॥ ॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

एतेयत्याद्ययोनकथंचिदप्याशौचभाजोभवंतीत्यर्थः॥२१॥ ॥अथयेषुयेषुकार्येषुयेषांयेषांसूतिकानांतत्का
लिकीआशुद्धिस्तेषांनामष्टादशेनवृत्तेनाह॥ ॥तत्तत्कार्येष्विति॥ ॥येषांयानियानिकार्याणिजीवितार्थेविहि
तानितेषांतेषुतेषुकर्तव्येषुअनन्यसाध्येषुसत्र्यादीनांसर्वाशौचंसदानोभवतीतिपूर्वश्लोकगतेनान्वयः॥ अत्र

तत्तत्कार्येषुसत्रिव्रतिनृपनृपवद्दीक्षितर्त्विक्स्वदेशाभ्रश्यापत्स्वप्य
नेकश्रुतिपरनभिषक्कारुशिल्प्यातुराणां॥

सत्रिणोऽन्नसत्रप्रवृत्ताः॥ व्रतिनः प्रार
ब्धप्रायश्चित्तलक्षणव्रताः॥नृपोराज्येऽभिषिक्तः नृपवान्राजसेवकः दीक्षितोयागकर्ता॥ऋत्विक्अध्वर्य्वा-
दिकर्मकर्तारः अनेकश्रुतिपरनोबहुवेदशाखाध्ययनशीलः आतुरोरोगी॥अन्येतुभस्कृद्गः एषांसर्वाशौचं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मि॰ टी॰ नैवनवर्णात्यर्थः॥ संभारब्धेषुदानादयउक्तवार्ताः प्रसिद्धाः॥ एतेषुसंभारब्धेषुनिष्पाद्यमानेषु॥ एतदर्थेएन्नि
२२ मित्तेकार्ये॥ एतैःसत्र्यादिभिःसंसाध्यमानकार्येइतियावत्॥ एतेषांसर्वाशौचंनोभवतीत्येतेनैवसंबंधः॥ तथा
चयाज्ञवल्क्यवचनम्॥ ऋत्विजांदीक्षितानांचयज्ञियंकर्मकुर्वतां॥ सत्रिव्रतिब्रह्मचारिदातृब्रह्मविदांतथा

संभारब्धेषुदानोपनयनयजनश्राद्धयुद्धप्रतिष्ठाचूडार्तार्थयात्राजप
परिणयनाद्युत्सवेष्वेतदर्थे॥ १८ ॥ ॥ ॥ ॥ ॥

दानेविवाहेयज्ञेचसंग्रामेदेशविप्लवे॥ आपद्यपिचकष्टायांसद्यःशौचंविधीयतइति॥ ॥ कष्टापद्येदुर्भि
क्षाद्याः तथाप्रचेतोवचनमपि॥ कारवःशिल्पिनोवैद्यादासीदासास्तथैवच॥ राजानोराजभृत्याश्चसद्यःशौ- २२
चाःप्रकीर्तिताइति॥ १८ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ छ ॥ ॥

For Private And Personal Use Only

॥ ॥इदानींमृत्युविशेषादप्याशौचापवादमेकोनविंशेनवृत्तेनाह ॥नाशौचाइति॥ ॥पतितास्तस्मृत्यंतरोक्ता स्त॥ ॥ पत्यादिघातिनीषुचस्त्रीषु मृतासुप्रसूतासुवाज्ञातयःसपिंडानाशौचाआशौचभाजोनस्युः तथा॥दोषाद्दोषेणहेतुनायत्पारवंडंवेदानुक्तधर्माभासमाश्रयंतेतेपारवंडिनः अविहितलिंगधारिणइतियाव त॥चोराःअननुज्ञातःद्रव्यहाराःआश्रमरहिताःसत्यधिकारेण्यकृताश्रमाविशेषपरिग्रहाःसुरापेयाःनिषि

नाशौचाज्ञातयस्स्युःपतितपतिसुतब्रह्मनिद्घातिनीषु
दोषात्पारवंडिचोराश्रमरहितसुरापेयहीनोपगासु ॥

द्धसुरापानरताःहीनोपगाःअधमेनसहसंभोगरताःआसुमृतासुचज्ञातयोनाशौचाःस्युरिति पूर्वेणसंबंधः अत्रलिंगमविवक्षितं॥तथासंदर्पोगर्वःतस्माद्दर्पेणनबुद्धिपूर्वंसर्पादीनद्दिवाकीर्तिश्वांडालस्तानपक

गुमाभिमुखत्वेन येमृताः संतखेह तान्नेषु मृतेषु नाशौचाद्यानयः स्युः॥ एभिर्दैवात्स्रेतेषु नेदमित्यर्थः॥ तत्रा
छायूर्वशस्त्रंलोहं ज्वलनोग्निः जलं वारि विषं वत्सनागादि॥ अनाशकमविहितोन्नत्यागः आदिशब्दाद्दो
तभृगुपतादिः॥ एभिः प्रकारैर्मृतेष्वपि ज्ञानयोनाशौचाः स्युरित्यन्वयः॥ पारवंड्य माश्रितास्तेनाभर्तृघ्न्यः का

संदर्पात्सर्पविप्रक्षितिपपशुदिनाकीर्तिकाद्यैर्हतेषुस्वेच्छा
पूर्वंचशस्त्रज्वलनजलविषानाशकाद्यैर्मृतेषु ॥ १९ ॥ ॥

मगादिकाः अधिकारे सत्यपि अकृताश्रमविशेषपरिग्रहाः॥ आदिशब्दात्स्वगर्भब्राह्मणघातिन्यो गृह्यंते॥ २३
॥ ॥ सुराप्यश्चात्मत्यागिन्यो नाशौचोदकभाजनाइति योगीश्वरस्मरणात् ॥ १९ ॥ ७ ७

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ इदानीमाशौचिनांयद्रुपादेयंतद्दर्शतिनमद्दत्तेनाह ॥ ॥नाशौचमिति॥ ॥यातिःगतिःमरणमितियावत्॥जा
तंजन्मनन्निमित्तमाशौचंयानिजाताशौचंतस्मिन्॥कृत्रिमंवानिमित्तांतरकृतंवाशौचेएषुशाकादिष्वामभा
ज्यांतेषुद्रव्येषुआशौचंआशौचसंबंधिदोषोनस्यात्॥एतानिसर्वाशौचेष्वपिनाशक्त्यानीत्यभिप्रायः॥अत्र
चमसंम्यंनपदानिनाशौचमित्यनेनमत्यंकयोन्यानि॥दद्यादद्यादिमानिस्वयमिति॥अनुमननात्॥तत्स्वा

**नाशौचंशाककाष्ठाजिनलवणतृणक्षीरनीरामिषेषुपुष्पेमूलेफलेचौ**
**षधिदधिमधुषुस्यात्तिलेश्वामभोज्ये॥**

म्यनुज्ञयाइमानिशाकादीनिस्वयमाशौचरहि
तःपुमानन्येभ्योदद्यात्॥स्वयंचाद्याच्च॥एवंकृतेदोषोनभवतीत्यभिसंधिः॥तथापणितमपणितंचसर्वंप
ण्यंशकचि स्यादितिस्पष्टं॥तथामरीचिः॥लवणेमधुमांसेचपुष्पमूलफलेषुच॥शाककाष्ठतृणेष्वप्सुदधि

सर्पिःपयःसक्त ॥ तिलौषधाजिनेनैवपक्वापक्वेस्वयंग्रहः ॥ पुण्येषुचैवसर्वेषुनाशौचंमृतसूतके मिति ॥ ॥
अत्रपक्वंभक्ष्यजातम् ॥ अपक्वंतंदुलादि ॥ एतत्पक्वापक्वाभ्यनुज्ञानमन्नसत्रप्रवृत्तविषयेज्ञेयम् ॥ अन्नस

इत्यादद्यादिमानिस्वयमनुमननात्स्वामिनोयातिजाताशौचेवाह्न
त्रिमेवार्पणानमर्पणितंचापिसर्वशुचिःस्यात् ॥ २ ॥ छ ॥

त्रप्रवृत्तानामाममन्नमगर्हितम् ॥ भुक्त्वापक्वान्नमेतेषांत्रिरात्रंतुपयःपिबेदित्यंगिरोवचनात् ॥ ३ ॥ इ
दानीमग्नेरुपादेयानुपादेयत्वमेकविंशतितमवृत्तेनाह ॥ ॥ ज्ञानारण्याग्निरेति ॥ ॥ अवाक्परि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

णयनविधेः विवाहात्प्राक् जातारण्यग्निना दग्धेर्दाहः कार्यः ॥ जातारणिर्जातकर्मसमये योऽरणिस्तन्मथनो
त्पन्नेनेति यावत् ॥ विवाहादूर्ध्वं आधानकालात् श्रौताधानादर्वाक् गृह्येण वैवाहेनाग्निना दग्धिः ॥ ततऊर्ध्वं तु आ
धानकालानंतरं विध्याहितहुतवहेनेर्विधिना आहिताविध्युक्ताधानाख्यसंस्कारैः संस्कृतयेदक्षिणाग्न्यादय

जातारण्याग्निनार्वाक् परिणयनविधेर्दग्धिराधानकालात् गृह्येणो
र्ध्वं तु विध्याहितहुतवहनैर्लौकिकेनान्यभावे ॥ ॥

स्त्रयस्तैरेवदग्धिः ॥ एतेषां जातारण्यग्न्यादीनामभावे लौकिकेनासंस्कृतेनाग्निना दग्धिरित्यन्वयः ॥ तदुक्तं
हस्थयाज्ञवल्क्येन आहिताग्निर्यथान्यायं दग्धव्यस्त्रिभिरग्निभिः अनाहिताग्निरेकेन लौकिकेनापरोजनइति

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ कश्चिल्लौकिकान्यपवादमाह ॥ ॥ चंडालाग्निमिति ॥ ॥ येनेदग्धो चंडालाग्न्यादीन् जत्यान्नोपादद्यात् ॥
तदुक्तं देवलेन ॥ चंडालाग्निरमेध्याग्निः सूतिकाग्निश्च कर्हिचित् ॥ पतिताग्निश्चिताग्निश्च न शिष्टग्रहणो
चित इति ॥ इंधनादावप्यपवादमाह ॥ शूद्रात्हृतेनेत्यादि ॥ इंधनं काष्ठं दहनो अग्निः घृतमाज्यं आदिशब्देन

चांडालाग्निं चिताग्निं पतितहुतभुजं सूतिकामेध्यवन्हीन्जत्या
च्छूद्रात्हृतेनेंधनदहनघृताद्येन दाहोप्यदाहः ॥ २१ ॥ ॥

पयःप्रभृति यदुपयुज्यते ॥
तत्संग्रहः शूद्रात्हृतेनेंधनादिना यो दाहः सोप्यदाह इति योजना कृतोप्यकृत एवेत्यर्थः ॥ तथा चाह यमः ॥ य
स्यानयति शूद्रोग्निं तृणकाष्ठहवींषि च ॥ प्रेतत्वं हि सदा तस्य स चाधर्मेण लिप्यत इति ॥ २१ ॥ ॥ ७ २५

॥ ॥अथद्वाविंशेनवृत्तेनदहनोतिकर्त्तव्यताधिकारिणावाह॥ सर्वमिति॥ एतत्सर्वंदाहादिकृत्यम्॥उपनय
नविधेःप्राक्तूष्णीममंत्रकमेवविदध्यात्॥तथाचोक्तमृलोमाक्षिणा॥ तूष्णीमेवोदकंकुर्यात्तूष्णींसंस्कारमे
वचेति॥परंतुउपनयनानंतरंस्वगृह्योक्तैस्तत्तद्विधानैर्विदध्यादितिस्पष्टम्॥अत्रचउपेतश्चेत्तदाआहिता-

सर्वंतूष्णीं विदध्यादुपनयनविधेःप्राक्परंतुस्वशाखागृह्योक्तै
स्तद्विधानैःसकलशवविधिंज्येष्ठपुत्रोवरोवा॥ ॥

ग्न्यादिनाव्रतार्थवदिति॥याज्ञव
ल्क्यवचवमनुसंधेयम्॥इदानीमधिकारिणंनिरूपयति॥ सकलेति॥सकलंसर्वशवविधिंप्रथमादिनमा
रभ्यदशाहांतंस्वगृह्योक्तंकर्मज्येष्ठपुत्रोऽनुपपत्त्यावरोवाविदध्यादितिसंबंधः॥पुत्राभावेकर्तृविशेषंदर्श

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यति॥ क्रमेणेति॥ क्रमेणपूर्वाभावे ऽपरइत्यनुक्रमेण॥ स्व कुलजः सपिंडः सोदकोवातदभावेजनन्यांवंश्यवंशजः ॥तदभावेशिष्यः तदभावेऋत्विक्॥ तदभावेआचार्योवाविदध्यादित्यन्वयः॥ स कलेत्यनेनदशाहांतंकर्तृभेदोन कार्यइतिसूचितम्॥ तथाचगृत्स्यपरिशिष्टे॥ असगोत्रः सगोत्रोवायदिस्त्रीयदिवापुमान्॥ प्रथमेहनियोदद्या

पुत्राभावेक्रमेणस्वकुलजजननीवंश्यशिष्यर्त्विजोवाचार्योवा
यत्रकुर्यात्प्रथमदिनविधिंसोपितत्सूतकांते ॥२२॥

त्सदशाहंसमापयेदिति॥ गौ तमस्मृतिश्च॥ पुत्राभावेसपिंडाः शिष्याश्चदद्युस्तदभावेऋत्विगाचार्याविति॥ इदानींदेशनियममाह॥ यत्रेति ॥यत्रयस्मिन्देशेप्रथमदिनविधिंकुर्यात्सोपिसएवदेशस्तत्सूतकांतंदशाहपर्यंतंतत्कर्माहतीतिशेषः॥ यत्रप्रथ मदिनकृत्यंकृतंतत्रैवदशाहपर्यंतंसमापनीयमित्यभिसंधिः॥ अत्रदेशनियमेशिष्टाचारोमूलमित्यनुसंधेयं ॥२२॥



For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ आनाम्नः नामकरणात्प्राक् उपरते मृते खातमात्रं खननं नमेव मात्रशब्दार्थं सूचयति ॥ न जलं हुतं हावितिस्पष्टम् ॥ नामवर्षत्रयांतः नामकरणात्तत आरभ्य वर्षत्रयांतः वर्षत्रयमध्ये उपरते जलं हुतं वह्नौ कामं स्वेच्छया नुष्ठेयौ न नियतौ ॥ ऊर्ध्वं वर्षत्रयानंतरं अकृतचूडेप्युपरते नित्यौ नियतौ भवतः ॥ ॥ कृतचूडे तु विशेषमाह ॥ चौलयुक्तो नित्यौ कालविशेषादिति ॥ कालविशेषाद्वर्षत्रयात्प्रागपि कृतचौडे नित्याविल्यर्थः ॥ खननविधिमाह ॥ अथेति ॥

आनाम्नः खातमात्रं न जलं हुतं वह्नौ नामवर्षत्रयांतः कामं
चोर्ध्वं तु नित्यौ भवत उपरते चौलके चौलयुक्ते ॥ ॥

पितृसुखराः पितृसुखाः खनने योग्यं प्रेतं स्नापयित्वा ॥ अथानंतरमंबरस्रक्गंधाद्यैः शोभयित्वा आज्यैर्विलिप्य निखननेयुरिति शेषः ॥ अत्र मूलं ऊनद्विवर्षं निखनेन्न कुर्यादुदकं न तदिति याज्ञवल्क्यवचनम् ॥

त्रिं॰का तथाऽनद्विवार्षिकंप्रेतंनिदध्युर्बांधवाबहिः॥ अलंकृत्यशुचौभूमावस्थिसंचयनादृते॥ नास्यकार्योऽग्निसंस्कारो
२७ नापिकार्योदकक्रिया॥ अरण्येकाष्ठवत्त्यक्त्वाक्षिपेयुस्त्र्यहमेवतु॥ ॥इतिमनुवचनं॥ तथा॥ ऊनद्विवार्षि

नित्यौकालाविशेषादथपितृसुरकराःस्नापयित्वांबरस्रक्
गंधाद्यैःशोभयित्वामृतमथखननेयोग्यमाज्यैर्विलिप्य॥२३॥

कंप्रेतंघृताक्तंनिखनेद्बहिः॥ यमगाथांगीयमानोयमसूक्तमनुस्मरन्निति॥ यस्यमरणेनमूलमित्यनुस- २७
धेयम्॥२३॥ ॥इदानींशवानयनेवर्णविशेषेणद्वारविशेषमाह॥ ॥प्रत्यगुद्वारेति॥ ॥

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अवनिसुरं ब्राह्मणं मृतं नगर्याः प्रत्यग्द्वारात् पश्चिमद्वारेण बहिर्नाययित्वा सर्वे ज्ञातयो वर्षीयः पूर्वं स्वं द्रुपुरःसरमनु
यायुः अनुगच्छेयुः अयमनुगमननियमो द्विवर्षाधिकमृतो ज्ञेयः ॥ तथाह याज्ञवल्क्यः ॥ आश्मशानादनुव्रज्य
इतरो ज्ञातिभिः सहेति ॥ क्षत्रियं तूत्तरद्वारेण ॥ वैश्यं प्राग्द्वारेण ॥ तृपलं शूद्रं दक्षिणस्यां दिशि यद्द्वारं तेन नाययि

प्रत्यग्द्वारान्नगर्या बाहिर वनिसुरं क्षत्रियं तूत्तरेण प्राग्द्वा
रेणैन वैश्यं पितृदि शिवृषलं नाययित्वानुयायुः॥ ॥

त्वा सर्वे ज्ञातयः वर्षीयः पूर्वं स्वं द्रुपुरःसरमनुयायुरित्यन्वयः ॥ तथा च स्मृतिः ॥ दक्षिणेन मृतं शूद्रं पुरद्वारेण नि
र्हरेत् ॥ पश्चिमोत्तरपूर्वैस्तु यथासंख्यं द्विजानयइति ॥ इदानीं वयोविशेषमृतस्यानुगमननियमापवाद-

For Private And Personal Use Only

माह॥ ऊनद्विशरद्दुपरतौविना ऽ ऊनद्विशरदुपरतौ द्विवार्षिकमृतौसत्यामनुयाने ऽनुगमनेनियमोन॥ तदुपरतौ अनुगमनं कर्त्तव्यं ना आवश्यकंनभवतीतियावत्॥ अत्रापिपूर्वोक्तायाज्ञवल्क्यस्मृतिरेवमूलं ॥ अथशूद्रस्पर्शनेतत्कृतवहनेचदोषमाह ॥ शूद्रैःस्पृष्टोथवोढोयदिति॥ यदिमृतः॥ प्रेतःशूद्रैःस्पृष्टः

वर्षीयःपूर्वमूनद्विशरदुपरतौनानुयानेनियामःशूद्रैःस्पृ
ष्टोथवोढोयदिभवतिमृतःप्रेतभावान्नमुक्तिः॥२४॥

अथवाऊढोभवतितदातस्यप्रेतभावान्नमुक्तिःएतदुक्तंसत्स्वब्राह्मणादिष्वितिज्ञेयं। तथाचमनुः॥ नविप्रंस्वे षुतिष्ठत्सुमृतंशूद्रेणहारयेत्॥ अस्वर्ग्याह्याहुतिःसास्याच्छूद्रसंस्पर्शदूषिते॥२४॥ ॥ ७ ॥ २८

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथपंचविंशेनवृत्तेनोदकदानेविशेषमाह ॥ ॥ ज्ञातयःसपिंडाःसोदकाश्च ॥ मातापितरौप्रसिद्धौ ॥ परमगुरुराचार्योमातामहश्च ॥ एतेषामंभउदकदानंनित्यमयममर्थः ॥ सपिंडानांसपिंडोद्देशेन ॥ सोदकानांसोदकोद्देशेन ॥ पुत्रस्यमातापित्रुद्देशेन ॥ तथाब्रह्मचारिणःआचार्योद्देशेन ॥ यदुदकदानंतन्नित्यमिति ॥ यथाह-याज्ञवल्क्यः सप्तमाद्दशमाद्वापिज्ञातयोभ्युपयंत्यपइति ॥ तथा ॥ एवंमातामहाचार्यप्रेतानांमुदकक्रियेति

ज्ञातीनांमातृपित्रोरपिपरमगुरोर्नित्यमंभोथमित्रप्र
त्तास्वस्त्रीययाज्यश्वशुरगुरुसुहृद्याजकानांयथेष्टं ॥

॥ इतरत्रनियमाभावमाह ॥ अथमित्रेति ॥ मित्रंसखा ॥ प्रत्तापरिणीतदुहितास्वसाच ॥ स्वस्त्रीयादयः ॥ प्रसिद्धाः ॥ एतेषांअंभोदानंयथेष्टं ॥ इच्छयाभवतीतिननियतमितिभावः ॥ तथाचयाज्ञवल्क्यः ॥ कामोदकं

सपिंडभक्तास्वस्त्रीयश्वशुरर्त्विजामिति॥ केषांचिदुदकदानेकर्तव्यापवादमाह॥ नव्रात्येत्यादिना॥ व्रात्यः पतितसानिधिकः ब्रह्मचर्यादयः एते प्रसिद्धाः॥ प्रेतायोदकंनदद्युरित्यन्वयः॥ तेकइत्यपेक्षायामाह॥ येत्वन्ने ति॥ येतुअन्नप्रेतप्रसंगेपिंडानलजलकथनानर्हकाः पिंडाद्यर्थेयोग्यास्तेपिउदकादिनादद्युरिति॥ केनइत्य

नव्रात्यब्रह्मचारिव्रतियतिपतितक्लीबपाखंडचोराद्
द्युर्येत्वन्नपिंडानलजलकथनानर्हकास्तेतुसूक्ताः॥२५॥

पेक्षायामाह॥ तेत्विति॥ तेपुनःसूक्ताःपूर्वोक्ताःस्पष्टाएवेति॥ तथाचस्मृतिः॥ नब्रह्मचारिणःकुर्यारुद-कंपतितानच॥ तथाचवृद्धमनुरपि॥ क्लीबाद्यानोदकंदद्युस्तेनाव्रात्यादिधर्मिणः॥ गर्भभर्तृदुहश्चैवसु राप्यश्चैवयोषितइति॥२५॥ ॐ॥ छ॥ छ॥ ॐ॥ छ॥ छ २९

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥अथषड्विंशेनवृत्तेनसंस्कारानंतरंयत्कार्यंतदाह॥ ॥संस्कृत्येति॥ ॥तेसकुल्कुलभवःसमस्तज्ञातयः॥बालपू
र्वंबालप्रमुखाःप्रेतंसंस्कृत्यदाहयित्वासंस्कारस्थलीमनीक्ष्यमाणानादेयेपयसिव्रजित्वावृद्धपूर्वंवृद्धपुरःस
रंयथाभवतितथासवसनाःसवस्त्राःएकवारंनिमज्यपाषाणेत्रिस्त्रिवारंसकृदेकवारंवाप्रतिदिनंप्रत्यहंदशादि

संस्कृत्यानीक्ष्यमाणाःसकुल्कुलभवोबालपूर्वंव्रजित्वाना
देयेवृद्धपूर्वंपयसिसवसनाएकवारंनिमज्य॥ ॥

नंयावदुदकंदद्यरित्यन्वयः॥उदकदानेवर्णभेदेनदिङ्नियमंविशदयितुंनाम्नाविशिनष्टि॥ब्राह्मणइत्या-
दिना॥ब्राह्मणेमृतेवतिदक्षिणास्याः॥दक्षिणाभिमुखाःक्षत्रियेमृतेवतिउदङ्मुखाःविशिवैश्येतुमृतेवति-

प्राङ्मुखा इति ॥ अन्नमूल्यं यथाविभागं शरीरमग्नौ संयोज्य अनवेक्ष्यमाणा आपोऽभ्युपयंतीति शातातपस्मृतिः ॥ प्रेत
स्य बांधवा यथा स्वन्द मुदकमवतीर्य तेतत्पर्यरेदकं ते प्रासिंचेयुः ॥ अपसव्ययज्ञोपवीनवासस्रो दक्षिणाभिमुखोत्रा

पाषाणोऽभिः सह द्यामर्तिर्दिनगुदकं ब्राह्मणे दक्षिणास्याः क्षत्रे
तूदङ्मुखा वैमृतनतिविशितु प्राङ्मुखास्तेददीरन् ॥२६॥

ह्मणस्य उदङ्मुखाः प्राङ्मुखाश्च क्षत्रियवैश्ययोरिति ॥ प्रचेतो वचनं यथा ॥ सकृत्प्रसिंचंत्युदकं नामगोत्रे- ३०
णवाग्यन इति ॥ याज्ञवल्क्यस्मृतिः ॥ त्रिः प्रसेकं कुर्युः ॥ प्रेतस्त्रप्यत्विति ॥ प्रचेतो वचनमपि मूलमित्यनुसंधे
यं ॥२६

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ अथसप्तविंशेनवृत्तेनउदकदानानंतरंयत्कार्यंतदाह ॥ ॥ स्नायुरिति ॥ ॥ ज्ञातयस्तत्रपर्यासन्नाःप
यसिभूयोपिउदकदानानंतरंपुनःस्नायुःस्नानंकुर्युः ॥ ततस्तैर्यत्कर्तव्यंतदाह ॥ त्रिनिशमिति ॥ त्रिनिशं
त्रिदिनमनशनाः संतः अहर्निशमेकमहोरात्रंवाअनशनाःक्रीतोत्पन्नाशनावासंतःक्रीतंक्रयेणप्राप्तं ॥

स्नायुर्भूयोपितत्रत्रिनिशमनशनाज्ञातयोहर्निशंवाक्री
तोत्पन्नाशनावामिषलवणपयःक्षीरमन्नंत्यजेयुः ॥

उत्पन्नंअयाचितप्राप्तं ॥ तदशन
वाआमिषंलवणंपयःक्षीरमन्नंत्यजेयुः ॥ तथास्त्रीसंगंमंगलानिव्यसनहसन मुद्रोदनोच्चासनानित्यजेयु
रितिपूर्वेणान्वयः ॥ तथानिशाकृत्यमाह ॥ ॥ तार्णास्तीर्णक्षितौनइति ॥ तृणनिर्मितंयदास्तरणंतत्तार्णं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तेनास्तीर्णा आच्छादितायाक्षितिर्भूमिः॥ तत्रातिनियताः॥ ब्रह्मचर्यादिनियमयुक्ताः॥ पृथक्‌निशायांसंविशेयुः
रितिस्पष्टमेतत्॥अत्रक्षीतलब्धाशनाभूमौस्वपेयुस्तेपृथक्पृथगितियाज्ञवल्क्यवचनम्॥ गृहान्व्रजि
त्वाधःप्रस्तरेत्र्यहमनश्नंतःआसीरन्॥ क्रीतोत्पन्नेनवावर्त्तेरन्नितिवसिष्ठवचनम्॥अक्षारलवणान्नाः

स्त्रीसंगंमंगलानिव्यसनहसनमुद्रोदनोत्थासंनानितार्णा
स्तीर्णाक्षितौतेपृथगितिनियताःसंविशेयुर्निशायाम्॥२७॥

स्युर्निमज्जेयुस्तत्तेत्र्यहं॥ मांसाशनंचनाश्नीयुःशयीयुस्तेपृथक्क्षितौइतिमनुवचनम्॥ तथाधःशय्या ३१
सनिनोब्रह्मचारिणश्चसर्वइतिगौतमवचनंमूलमनुसंधेयम्॥२७॥ ॐ ॐ

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥अष्टाविंशतिवृत्तेनदशाहसंबंधिविधिमाह॥ ॥संस्कर्तेति॥ ॥संस्कर्त्तादाहकः दहनतः दहनानंतरंप्र
त्यहंप्रतिदिनंदशाहावधिदर्भपुंजेभूमावेवास्तृतेदर्भपुंजेएकैकंपिंडंसमधुयथाभवतितथाआवपेतयाव
द्दशाहमेकैकमेवपिंडंदद्यादितिभावः तथाचस्मृतिः॥ नवभिर्दिवसैर्दद्यान्नवपिंडान्समाहितः॥ दशमंपिंडमु

संस्कर्त्तादर्भपुंजेसमधुदहनतःप्रत्यहंपिंडमेकंभूमा
वेवावपेतप्रथमदिनचरुद्रव्यमेवोपरिष्टात्॥ ॥

त्सृज्यरात्रिशेषेशुचिर्भवेत्॥ तद्व्यापानिमंत्रणाभिप्रायेण अत्रभूमावित्यनेनपाषाणादिव्या वृत्तिःसूचि
ता॥तदुक्तंशंखेन॥ भूमौमाल्यंपिंडपानीयंअनुलेपनानिदद्युरिति॥ पिंडदानेद्रव्यनियममाह॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रथमदिनेयक्षरुद्रव्यंतरदेवोपरिशाद्यावद्दशाहंकर्त्तव्यंनद्व्यांतरमुपादेयमितियावत्॥ तदुक्तंशकुनःपुच्छमु
निना॥ शालिनासक्तुभिर्वापिशाकैर्वाथविनिर्वपेत्॥ प्रथमेहनियद्व्यंतदेवस्याद्दशाहकमिति॥ ॥
अथचयनकालमाह॥ ॥ दाहान्हादेवेति॥ चयनदिनंदाहान्हादेवगण्यंनमरणदिनात्संचयनम्॥

दाहान्हादेवगण्यंचयनदिनमिदंचादितोन्हांचतुर्णा

अस्थिसंचयनंदाहान्मृताहस्तुयथाविधात्यंगिरोवचनादितिभावः॥ इदंचयनमादितः॥ दाहदिनतःथा
निचत्वारिदिनानितेषांचतुर्णांदिनानांमध्येएकस्मिन्दिनेदाहतःसप्तमे वाहनिनवमदिनेनाकार्यमि-

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

तिशेषः॥ तथाचसंवर्त्तः॥ प्रथमेन्हितृतीयेवासप्तमेनवमेतथा॥ अस्थिसंचयनंकार्यंदिनेतद्गोत्रजैःसह॥ त
थाचस्मृत्यंतरमपि॥ द्वितीयेत्वस्थिसंचयइति॥ ॥तथाविष्णुरपि॥ चतुर्थदिवसेऽस्थिसंचयनंकुर्यात्॥

मेकस्मिन्सप्तमेवाह्निनवमदिनेवानुपेतेतुनैतत्॥२८॥

तेषांचगंगांभसिप्रक्षेपइति॥ ॥ अनुपेतेउपवीतरहितेएतदस्थिसंचयनादिकंनस्यादितिग्रंथांतरात्
ज्ञातव्यम्॥२८॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ ॥अथैकोनत्रिंशद्वृत्तेनवपनादिविधिमाह॥ ॥वर्षीयसीति॥ ॥ वर्षीयसिवृद्धउद्धृतेसंस्थितेसतितुपु
नःसूतकांतेदशमेहनिउपरिवपननखच्छेदनंकनीयांसःकुर्युरितिशेषः॥उपरिपवनमूर्ध्वजकेशश्मश्रुवप
नंच॥अथवाकेचिन्मध्येआशौचमध्येद्वितीयेतृतीयेपंचमेसप्तमेदिनेवाकर्तव्यमूचुरिति॥तथाचदेव

वर्षीयस्युद्धृतेतूपरिवपननखच्छेदनंसूतकांतेमध्येवा
केचिदूचुःपितृपरमगुरूष्वेववापादिनित्यम्॥ ॥

लः॥दशमेहनिसंप्राप्तेस्नानंग्रामाद्बहिर्भवेत्॥तत्रत्याज्यानिवासांसिकेशश्मश्रुनखानिचेति॥तथाचस्मृ ३३
त्यंतरम्॥द्वितीयेहनिकर्तव्यंक्षुरकर्मप्रयत्नतः॥ तृतीयेपंचमेवापिसप्तमेवाप्रदानतइति॥ वपनेपिनि

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

मित्तविशेषेणावश्यकतामाह ॥ पितृपरमगुरुष्वेववापादिनित्यम् ॥ एष्वेवसंस्थितेषुवापादिनित्यमाव-
श्यकंपुत्रादीनांनेतरत्रेतिभावः॥ तदुक्तम् ॥ गंगायांभास्करक्षेत्रेमातापित्रोर्गुरोर्मृते ॥ आधानकालेसो-
मेचवपनंसप्तसुस्मृतमिति ॥ सूतकांतेयत्कर्मकर्त्तव्यंतदाह ॥ ॥अत्रेति ॥ ॥ अत्रयस्मार्त्तक

अत्रस्मार्त्तंशुभार्थेभणितमभणितंतत्स्वगृह्येर्विदित्वाकृ
त्वादानंचदद्यादशुभभयभिदेभूसुरेभ्यःशुभार्थे ॥ २१॥

र्मकर्त्तव्यतयामयोक्तम् ॥ यच्चनोक्तंतत्सर्वंस्वगृह्योक्तंविदित्वाअनुष्ठायपश्चादशुभभयभिदेअशुभ
नाशायभयार्थंशुभप्राप्तयेचभूसुरेभ्योब्राह्मणेभ्योदानंदद्यादित्येतत्स्पष्टम् ॥ २१॥ ७१ ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥अथशवंदग्ध्वाप्रत्यागतानांप्रेतगृहप्रवेशनविधिंत्रिंशेनवृत्तेनाह॥ ॥दत्वेति॥ ॥सपिंडाःपूर्वोक्ताःप
रशववहनस्नापकाश्चसर्वेपिंडंदत्वादत्तेपिंडेतद्वेश्मतस्यप्रेतस्यसंबंधिगृहंव्रजित्वास्य वेश्मद्वारिप्रशमितम
नसःअवहितचित्ताःवेश्यसंतः तद नंतरंनिंबपत्रंविदश्यचर्वित्वापश्चादाचम्यानंतरमग्न्यंबुदूर्वांकुरवृष

दत्वापिंडंसपिंडाःपरशववहन स्नापकाश्चव्रजित्वातद्वेश्मद्वारिचास्यप्रशमि
तमनसोनिंबपत्रंविदश्य॥आचम्याग्न्यंबुदूर्वांकुरवरवृषभानक्षतान्गो
मयंचस्पृष्ट्वासिद्धार्थतैलान्यथदृषादिपदंन्यस्यसर्वेविशेयुः॥३०॥ ॥

भान्गोमयंचसिद्धार्थतैलानिचस्पृष्ट्वा॥दृषदिपाषाणेपदंन्यस्य॥सर्वेगृहंविशेयुरितिसंबंधः॥तथा-
चस्मृतिः॥इतिसंस्कृत्यगच्छेयुर्गृहंबालपुरःसराः॥विदश्यनिंबपत्राणिनियताद्वारिवेश्मनः॥आचम्या

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ग्न्यादिसलिलंगोमयंगोरसर्षपान्॥ प्रविशेयुः समालभ्यकृत्वाश्मनिपदंशनैरिति॥३०॥ ॥ इतित्रिंशच्छ्लोकीभाष्यसंहितासमाप्ता॥ ॥ ॥अथास्थिशुद्धिः॥ तदुक्तंस्कांदे॥ पंचगव्येनसंस्नाप्यततः पंचामृतेनवै॥ यक्षकर्दमलेपेनलिप्त्वापुष्पैःप्रपूज्यच॥आवेष्ट्यनेत्रवस्त्रेणततोमांजिष्ठवाससा॥ नेपालकंबलेनाथमृदाचाथविशुद्धया॥ ताम्रसंपुटिकेकृत्वात्वस्थ्नांशुद्धिरुदाहृता॥ यक्षकर्दमलक्षणं॥ कस्तूरिकायाद्वौभागौद्वौभागौकुंकुमस्यच॥ चंदनस्यत्रयोभागाःशशिनस्त्वेकएवहि॥ यक्षकर्दमइत्येषःसमस्तसुरदुर्लभः॥ ४॥ ॥ ॥ ॥ ॥

श्रीशके १७०१ सिद्धार्थीनामाब्दे चैत्रशुक्लचतुर्थ्यांतद्दिनेपुस्तकंसमाप्तम्॥ ॥ ७॥ ७
हेंपुस्तकबापुसदाशिवशेटहेगिष्टेयांच्याछापरवान्यांतछापिलें मुकाम मुंबई॥ ॥ ॥
ओ॰३ पट्टकूलं ओ॰३ श्वेतोर्णा॰

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

इतित्रिंशच्छ्लोकीसमाप्ता॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www. kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

For Private And Personal Use Only